# कलियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालय:

(केन्द्रीयमानवसंसाधनविकाशमन्त्रालययोजनान्तर्गत:, नवदिल्लीस्थकेन्द्रीयसंस्कृतविश्वविद्यालयानुमोदित:)

हेडिया,पूर्वमेदिनीपुरम्, पश्चिमवङ्गः - ७२१४३०



## कलियाचक-आदर्शवार्त्ता

### वार्षिकी वार्त्तापत्रिका

● वर्षम् - २०२०-२०२१ ● द्वितीयपुष्पम् ● शकाब्द: - १९४२ ● विक्रमाब्द: - २०७७

प्रो. के. बि.सुब्बरायुडु
कुलपति (प्र.)
केन्द्रीय संस्कृत विश्वविद्यालय
संसद के अधिनियम द्वारा स्थापित
(पूर्व में राष्ट्रिय संस्कृत संस्थान, मानित विश्वविद्यालय)
शिक्षा मन्त्रालय, भारत सरकार के अधीन
५६-५७, सांस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - ११००५८

Prof. K.B. Subbarayudu
Vice-Chancellor (I/c)
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
Under Ministry of Education, Govt. of India
56-57, Institutional Area, Janakpuri, New Delhi - 110058



## सन्देश:

### तत्त्वं पूषन् अपा वृणु सत्यधर्माय दृष्टये

केन्द्रीयसंस्कृतविश्वविद्यालयसम्बद्धेषु आदर्शसंस्कृतमहाविद्यालयेषु अन्यतम: पश्चिमवङ्गस्थित: कलियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालय: स्वीयकर्मणा सुप्रसिद्धोऽस्ति सर्वत्र। महाविद्यालयेऽस्मिन् सततं पठनपाठनतत्परा: छात्रा: अध्यापकाश्च सारस्वतकर्मसु दत्तचित्ता: वर्तन्ते नितराम्। तत्सदृशेषु कर्मसु वार्षिकी वार्त्तापत्रिका प्रकाश्यते एभि: 'कलियाचक-आदर्शवार्त्ता' इति नाम्ना। ऐषम: महाविद्यालयपक्षत: पत्रिकाया: द्वितीयसंस्करणं प्रकाशयिष्यते इति ज्ञात्वा महान् आनन्द: सञ्जात:। परमात्मन: अपारकरुणया महाविद्यालय: दिग्दिगन्तव्यापिकीर्त्तिं लभतु प्रचार: प्रसारश्चास्य सर्वतो भवत्विति कामयमान: शुभावसरेऽस्मिन् सर्वेभ्य: शुभकामान् वितनोमि।

(प्रो.के.बी.सुब्बरायुडु:)

Ph. No. : (O) 011-28523949, EPABX : 28524993, 28521994, 28524995
EMAIL : kbsubbarayudu@gmail.com / vc@csu.co.in, WEBSITE : www.sanskrit.nic.in

प्रो. एस् . सुब्रह्मण्य शर्मा
कुलसचिव
केन्द्रीय संस्कृत विश्वविद्यालय
संसद के अधिनियम द्वारा स्थापित
(पूर्व में राष्ट्रिय संस्कृत संस्थान, मानित विश्वविद्यालय)
मानव संसाधन विकास मन्त्रालय, भारत सरकार के अधीन

Prof. S. Subrahmanya Sarma
REGISTRAR
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan, DU)
Under MHRD, Govt. of India

## शुभसन्देश:



लोके कर्तव्याकर्तव्यबुद्धिं जनयति प्रज्ञा। प्रज्ञा संपत्तौ विपत्तौ च बुद्धिं व्यवस्थापयति। प्रज्ञा च विनयजन्या। विनयान्वित: एव लोके महीयते। अस्य सर्वस्यापि मूलं विद्यते विद्या। यथाह सुभाषितकार: -

विद्या ददाति विनयं विनयाद्याति पात्रताम्। पात्रत्वाद्धनमाप्नोति धनाद्धर्मं तत: सुखम्।।

विद्या तु निरन्तराध्यनेन अभ्यासेन च साधनीया भवति। विद्याया: तद्गतशास्त्राणां च प्रचार: प्रसार: सतताध्ययनाध्यापनाभ्याम्।आधुनिककाले प्राचीनविद्यासंस्थानामपि प्रचार: अपेक्षित: विद्यते। तदर्थं वार्तापत्रिका: प्रकाश्यन्ते संस्थाभि:। तदनु केन्द्रीयसंस्कृतविश्वविद्यालयेन संबद्ध: पश्चिवङ्गान्तर्गतपूर्वमेदिनीपुरस्थ: कालियाचक-विक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालय: कलियाचक-आदर्शवार्ता नामकस्य वार्तापत्रस्य द्वितीयम् अङ्कं प्रकाशयतीति विदित्वा नितरामानन्दमनुभवामि। वार्तापत्रमिदं महाविद्यालयस्य प्रगते: प्रापणाय च सेतुरिव स्यात् इति विश्वसिमि। वार्तापत्रस्य सम्पादकानां प्राचार्याणां च प्रयास: अत्यन्तं श्लाघ्य:। वार्तापत्रमिदं सर्वजनग्राह्यं भूयात् इति भगवन्तं प्रार्थये।

भावत्क:

प्रो.एस्.सुब्रह्मण्य शर्मा

56-57, Institutional Area, Janakapuri, New Delhi-110058 (INDIA)
Ph. No. : (O) 011-28520979, Fax : 28520976, EPABX : 28524993, 28521994, 28524995
EMAIL : sanskrit.registrar@gmail.com / ps2reg.csu@mail.com WEBSITE : www.sanskrit.nic.in

KALIACHAK BIKRAM KISHORE ADARSH SANSKRIT MAHAVIDYALAYA
Recognised by : Central Sanskrit University, New Delhi.
Under Ministry of Education.
Government of India
Vill.- Kaliachak ✪ P.O.- Heria ✪ Dist.- Purba Medinipur ✪ West Bengal ✪ Pin- 721430
Tele Phone : (03220) 276036, Email - kaliachakbkasm@yahoo.com / @gmail.com

## अध्यक्षशुभासंशा

### कृण्वन्तो विश्वमार्यम्



भगवत्या: सरस्वत्या: कृपया कालियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयेन कलियाचक-आदर्शवार्त्ता इत्याख्याया: वार्त्तापत्रिकाया: द्वितीयं पुष्पं प्रकाश्यत इति विदित्वा सुतरां मोमुद्यते मे मन:। करोनाक्रान्ते समये यद्यपि महाविद्यालय: पिनद्ध आसीत् तथापि शिक्षावर्षेऽस्मिन् गुगुलमिट्माध्यमेन बहव: शैक्षिकसांस्कृतिककार्यक्रमा: समायोजिता: अन्तर्जालमाध्यमेन प्रसारिताश्च ।अस्यां पत्रिकायां तेषां समेषां कार्यक्रमाणां विवरणं सचित्रं प्रदास्यते । महाविद्यालयस्य प्रकाश्यमानेयं पत्रिका सर्वेषां विद्वत्तल्लजानां विविदूषाणां माणवकानाञ्च महते कल्याणाय कल्पत इति विश्वसिमि। अनेन पत्रिकामाध्यमेन महाविद्यालयस्य संस्कृतस्य च महान् प्रचार: प्रसारश्च भविष्यति।

अस्मिन् शुभावसरे सर्वदाऽस्मान् प्रोत्साहितवद्भ्य: कुलपतिभ्य: प्रो.के.बी.सुब्बरायुडुवर्येभ्य:, कुलसचिवेभ्य: प्रो. सुब्रह्मण्यशर्मवर्येभ्य: सादरं कार्तज्ञं विनिवेदयामि। अत्र सन्दर्भे कृतकार्याणां महाविद्यालयस्य प्राचार्यसमेतानां सर्वेषां प्राध्यापकानां छात्राणां कर्मचारिणां भगवान् श्रीजगन्नाथो मङ्गलमातनोतु इति सम्प्रार्थये।

प्रो. किशोर चन्द्र पाढी
परिचालनासमिते: अध्यक्ष:

प्रो. सुकान्त कुमार सेनापति:
निदेशक: मुक्तस्वाध्यायपीठम्
केन्द्रीयसंस्कृतविश्वविद्यालय:
संसद: अधिनियमेन स्थापित: भारतसर्वकारस्य शिक्षामन्त्रालयाधीन:
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली-110058
जङ्गमवाणी- 09717823344, 011-28524993/995
ई-मेल : sukantsnpt@gmail.com

Prof. Sukanta Kumar Senapati
Director of MSP
CENTRAL SANSKRIT UNIVERSITY
Established by an Act of Parliament
Under Ministry of Education, Govt. of India
56-57, Institutional Area, Janakpuri, New Delhi-110058
Mob. No.: 09717823344, 011-28524993/995
Email. sukantsnpt@gmail.com

## मङ्गलाशंसनम्

### वन्दे संस्कृतमातरम्



भारतं ज्ञानधनानां तपोधनानां च मनीषिणां राष्ट्रम्। संस्कृतमस्ति राष्ट्रस्य हृदयं विवेकस्य च वाणी। ज्ञान-विज्ञान-ऐतिह्य-संस्कृति-व्यवहारादीनां च भाषा संस्कृतम्। अत: संस्कृतं मानवताया: परिचायकम्। केन्द्रीयसंस्कृतविश्वविद्यालयान्तर्गतेन कालियाचक-विक्रमकिशोार-आदर्शसंस्कृतमहाविद्यालयेन कालियाचक-आदर्शवार्त्ता संस्कृतपत्रिका प्रकाश्यते इति ज्ञात्वा मोदमनुभवाम:। संस्कृतसेवाधूरिणां महाविद्यालयस्य सर्वेषाम् अध्यापकानां कर्मचारिणां च कृते साधुवादं ज्ञापयामि।महाविद्यालयोऽयं सततं सारस्वतसेवायाम् अग्रेसरो भूत्वा समाजस्य कृते आदर्शं स्थापयतु इति भगवन्तं सम्प्रार्थ्य विरमामि।

जयतु भारतं जयतु संस्कृतम्।।

सुकान्त कुमार सेनापति:

प्रो॰सुकान्तकुमारसेनापति:

प्रो. पवनकुमार:
परीक्षानियन्त्रक: (प्र.)
केन्द्रीयसंस्कृतविश्वविद्यालय:
संसद: अधिनियमेन स्थापित: भारतसर्वकारस्य शिक्षामन्त्रालयाधीन:
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली-110058
दूरभाष-011-28521258
जङ्गमवाणी-8730894144, 7840094144
ई.मेल: pkcsu2020@gmail.com

Prof. Pawan Kumar
Controller of Examinations (I/C)
CENTRAL SANSKRIT UNIVERSITY
Established by an Act of Parliament
Under Ministry of Education, Govt. of India
56-57, Institutional Area, Janakpuri, New Delhi-110058
Tel. : 011-28521258
Mob. : 873089144, 7840094144
Email. pkcsu2020@gmail.com



## शुभसन्देश:

**आचार्यं मां विजानीयान्नवमन्येत कर्हिचित्।**
**न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरु:।।**(श्रीमद्भागवतम्,११.७.२७)

वचनमिदं गुरुं देवनां प्रतिनिधिरूपेण प्रतिष्ठापयति। समाजपथप्रदर्शकत्वेन गुरो: स्थानमेतावता यथावत् वरिवर्ति। गुरुश्च आधुनिककलेवरेऽपि प्रासङ्गिको भूत्वा समाजमुपकरोति भृशम्। शैक्षणिकसंस्थासु गुरो: भूमिका पूर्वापेक्षया विस्तृता उत्तरदायित्वपूर्णा चावलोक्यते। शैक्षिकसंस्थासु जायमानानां क्रियाकलापानाम् अभिलेखीकरणं साम्प्रतमत्यन्तं महत्त्वपूर्णम्। शैक्षिकसंस्थाभि: कृतानां कार्याणां पत्रिकासु प्रकाशनेन प्रध्यापका: छात्राश्च प्रोत्साहिता: जायन्ते। अत: पत्रिकाप्रकाशनं नानार्थप्रयोजनसाधकं गौरवास्पदञ्च।

महदिदं प्रमोदस्थानं यत् कलियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालयेन प्रतिवर्षं कलियाचकवार्तापत्रिका लोककल्याणाय महता श्रमेण प्रकाश्यते इति। अनया पत्रिकया महाविद्यालयीया: सर्वेऽपि कार्यक्रमा: एकत्रं सचित्रं क्रोडीकृता: संकलिताश्च मुद्रिता: जायन्ते इति वस्तुत: प्रशंसनीय: कार्यविशेष:। नूनमनेन सङ्कलनेन प्राध्यापकै: सह छात्रा: सामाजिकाश्च लाभान्विता: भविष्यन्तीति मे दृढविश्वास:।

महाविद्यालयीया: अधिकारिण: सम्पादकमण्डलसदस्याश्च विशिष्य अभिनन्दनार्हा: यत: तै: कृतपरिश्रमस्य फलत्वेन पत्रिकेयं प्राकाश्यमागच्छतीति।

अभिवन्दनपुरस्सरम् अभिनन्दनम्।

(प्रो. पवनकुमार:)
परीक्षानियन्त्रक:(प्र.)
केन्द्रीयसंस्कृतविश्वविद्यालय:
५६-५७, इन्स्टीट्यूशनल एरिया,
जनकपुरी, नवदेहली-५८

---

KALIACHAK BIKRAM KISHORE ADARSH SANSKRIT MAHAVIDYALAYA
Recognised by : Central Sanskrit University, New Delhi.
Under Ministry of Education.
Government of India
Vill.- Kaliachak ✪ P.O.- Heria ✪ Dist.- Purba Medinipur ✪ West Bengal ✪ Pin- 721430
Tele Phone : (03220) 276036, Email - kaliachakbkasm@yahoo.com / @gmail.com



## प्राचार्यवार्त्ता

### तन्मे मन : शिवसंकल्पमस्तु

महत: आनन्दस्यावसर: यदस्माकं महाविद्यालयपक्षत: कलियाचकआदर्शवार्त्तापत्रिका प्रकाश्यत इति। पत्रिकायामस्यां महाविद्यालयस्य विविधशैक्षिकसांस्कृतिकक्रियाकलापा: सन्निवेशिता: सन्ति। करोनाकारणत: वर्षद्वयाभ्यन्तरे महाविद्यालयपक्षत: अन्तर्जालेन येषां सारस्वतकार्यक्रमाणाम् आयोजनमभवत् तेषां सम्प्रति विवरणं सर्वै: अनया ज्ञातुं शक्यते। अनया पत्रिकया समेऽपि संस्कृतानुरागिण: नूनमुपकृता: भविष्यन्ति। अवसरेऽस्मिन् सर्वेभ्योऽन्तेवासिभ्य: भृशमभिनन्द्य सम्पादकेभ्यश्च साधुवादं वितीर्य भगवत्या: सुरभारत्या: सरस्वत्या: पदारविन्दयो: पत्रिकाया: अस्या: दीर्घायुष्यं सम्प्रार्थ्य विरमामि विस्तरात्।इति।

डॉ.देवीपदरथ:
प्राचार्य:

---

## दिवङ्गतानां डॉ.रमेशझामहाभागानां देहान्तावसरे

### श्रद्धाञ्जलिज्ञापनम्

### न हन्यते हन्यमाने शरीरे



### स्वर्गत: डॉ.रमेशझामहोदय:

आविर्भाव: ०९/०३/१९६९ तिरोभाव:२३/१२/२०२०

**शब्दब्रह्मणि निष्णात: परब्रह्माधिगच्छति।**

महाविद्यालये कार्यं कुर्वाणा: व्याकरणविभागमुख्या: विद्यावाचस्पतय: डॉ.रमेशझामहोदया: २३/१२/२०२० दिनाङ्के बुधवासरे करालकोरोनाकालकवलितस्सन्त: दिवङ्गता:। दिवङ्गतानां वैकुण्ठवसतिकामनापूर्वकं तेषां पुण्यात्मनां कृते गभीरश्रद्धाञ्जलिज्ञापनं क्रियते। १९९९ तमे वर्षे इमे महोदया: महाविद्यालयेऽस्मिन् कार्यं प्रारभन्त। महाविद्यालयस्य नैकासु समितिषु सदस्या: आसन्। प्रतिभाशालिन: इमे शब्दशास्त्रे कृतभूरिपरिश्रमा: आसन्। स्वभावेन सरला:, देवपूजका:, छात्रवत्सला:, सहृदया:, विद्याविनयसम्पन्ना: नैकगुणगणविभूषिताश्चासन्। एतेषां वियोगेन न केवलं महाविद्यालयस्य अपि तु संस्कृतजगत: अपूरणीया क्षति: सञ्जाता। ऐषम: कलियाचकआदर्शवार्त्तापत्रिकाया: द्वितीयसंस्करणस्य प्रकाशनावसरे श्रद्धासुमनरूपेण तेषां चरणकमलयो: विनम्रश्रद्धया द्वितीयवार्त्ताकुसुमं समर्प्यते।












# नवीनभवनानामुद्घाटनम्

महाविद्यालयपरिसरे निर्मितस्य नूतनशैक्षिकभवनस्य १४-०३-२०२० तमे दिनाङ्के उद्घाटनमभवत्। तत्र समारोहेऽस्मिन् पश्चिममेदिनीपुरान्तर्गतभगवानपुरनिर्वाचनमण्डलस्य मान्यवरविधायकमहोदया: श्रीमन्त: अर्धेन्दुमाइतिमहोदया: समुद्घाटकरूपेणात्र समुपस्थिता: आसन्। तेषामनुदानेन निर्मितमिदं भवनं तेषामेव करकमलाभ्यां महाविद्यालयाय समर्पितम्।

इतश्च महाविद्यालयस्य प्रबन्धनसमिते: भूतपूर्वाध्यक्षणां श्रीनितीशकुमारसेन्गुप्तमहोदयानां धर्मपत्न्या: नामानुसारं श्रीमतीडॉ.सुनन्दासेन्गुप्तपाठागार: इत्यनेन नूतनपुस्तकालयभवनस्यापि अस्मिन्नेवावसरे शुभोद्घाटनं सञ्जातम्। विशेषत: अस्य नूतनभवनस्य अनुदानकर्त्रीरूपेण प्रबन्धनसमिते: भूतपूर्वाध्यक्षणां दुहिता तमालीसेन्गुप्त एवासीत् इति।

किञ्च महाविद्यालयस्य नूतनस्य संगोष्ठीभवनस्यापि शुभोद्घाटनं(सेमिनार् हल् )शुभावसरेऽस्मिन् अभवत्। वस्तुत: महाविद्यालयस्य कार्यक्रमाणां परिचालनाय तथाविधभवनस्य महती आवश्यकताऽऽसीत्। अत: केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुदानेन तथा अद्वैतवेदान्तस्य भूतपूर्वाध्यापकानां डॉ.लक्ष्मीकान्तपाहाडी महोदयानां स्वेच्छाकृत-अनुदानसाहाय्येन भवनस्य निर्माणमभूत्।

समारोहेऽस्मिन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतय: परमेश्वनारायणशास्त्रिण: उत्सवस्यास्य साक्षिभूता: आसन्। तैस्सह महाविद्यालयस्य प्रबन्धनसमिते: अध्यक्षा: प्रो.किशोरचन्द्रपाढीमहोदया: कार्यक्रमेऽस्मिन् समुपस्थिता: आसन्। कार्यक्रमोऽयं प्राचार्याणां देवीपदरथमहोदयानां तथा महाविद्यालयसदस्यानां सहयोगेन पूर्णतामगात्।





# वार्षिकोत्सव : २०२०

### वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते।

महाविद्यालयस्य वार्षिकोत्सव: १४/०३/२०२० तमे दिनाङ्के महता समारोहेण पालितोऽभवत्। महाविद्यालयप्राचार्यस्य डॉ.देवीपदरथमहोदयस्य स्वागतवचोभि: कार्यक्रमस्यायमारम्भो जात:। महाविद्यालयप्रबन्धनसमिते: अध्यक्षपादानां प्रो.किशोरचन्द्रपाढीमहाभागानामाध्यक्षेण आयोजितेऽस्मिन् सारस्वतमहोत्सवे भगवानपुरनिर्वाचनमण्डलस्य मान्यवरविधायका: श्रीमन्त: अर्धेन्दुमाइतिमहोदया: मुख्यातिथिरूपेणोपस्थिता: आसन्। महाविद्यालयोऽयं संस्कृतप्रचारप्रासरक्षेत्रे स्वीयगरिमया सुप्रसिद्ध:। अनुदिनं क्रियमाणकार्यक्रमादिभि: अयं महाविद्यालय: निश्चप्रचं प्रयासरतोऽस्तीति सर्वे अतिथय: स्वाभिप्रायान् प्रकटितवन्त:। वार्षिकोत्सवावसरे प्रायोजितासु विविधसांस्कृतिक-शैक्षिक-क्रीडास्पर्धासु विजेतृभ्य: छात्रेभ्य: अतिथय: पुरस्कारान् प्रदत्तवन्त:। तदनु छात्रा: सांस्कृतिककार्यक्रममाध्यमेन समेषां मनंसि हृतवन्त:। एतेषु विशेषाकर्षणमासीत् महाकविकालिदासविरचित-अभिज्ञानशाकुन्तलनाटकस्य शकुन्तलाया: पतिगृहगमनमिति रूपकस्य पर्यवेषणम्। कार्यक्रमस्यास्य संयोजनं डॉ.नृसिंहनाथगुरुमहाभागेन कृतम्। महता प्रमोदेन वार्षिकोत्सवऽयं सुसम्पन्नो जात:।










# एकदिवसीया राष्ट्रिया संगोष्ठी

### वादे वादे जायते तत्त्वबोध:

१५-०३-२०२० तमे दिनाङ्के 'भारतीयसंस्कृतौ वर्णाश्रमव्यवस्था' इति विषयमाश्रित्य पञ्चमी एकदिवसीया राष्ट्रिया संगोष्ठी समायोजितासीत्। तत्र महाविद्यालयप्रबन्धनसमिते: अध्यक्षवर्याणां प्रो. किशोरचन्द्रपाढीमहाभागानामाध्यक्षे संगोष्ठीयं प्रारब्धा। अस्यां संगोष्ठ्यां मुख्यवक्तृरूपेण उत्कलप्रदेशस्थस्य वागीश्वरीसंस्कृतमहाविद्यालयस्य प्राचार्या: महान्त: वैयाकरणा: शब्दशास्त्रनिष्णाता: डॉ.विवेकानन्दसाहुवर्या: योगदानमकुर्वन्। वर्तमानसमये वर्णाश्रमव्यवस्थाया: प्रासङ्गिकतामाधारीकृत्य प्रदत्तं तेषां भाषणं सर्वै: प्रतिभागिभि: , आचार्यै:, अध्यापकै:, छात्रैश्च भृशमभिनन्दितम्। धर्मशास्त्रनिष्णाता: विद्वान्स: महाविद्यालयस्य प्राचार्या: डॉ.देवीपदरथमहाभागा: अतिथीनां परिचयप्रदानपुरस्सरं कुञ्चिकाभाषणं प्रदत्तवन्त:। पश्चिमवङ्गस्थेषु महाविद्यालयेषु अनेके अध्यापका: शोधच्छात्राश्च पत्रवाचकरूपेणात्र समुपस्थिता: आसन्। संगोष्ठीयं चतुर्षु सत्रेषु प्रायोजिता आसीत्। उद्घाटनसत्रानन्तरं सत्रद्वये संगोष्ठ्या: विषयमाधारीकृत्य नैकानि पत्राण्युपस्थापितानि।मातृकल्पा: मीनाक्षिमिश्रमहोदया: वर्णाश्रमव्यवस्थामाधारीकृत्य स्वीयबहुमूल्यशोधपत्रमुपस्थापितवत्य:। अन्तिमसत्रे अस्या: समापनमभवत्। सर्वेषां कृते उपयोगिभूतेयं संगोष्ठी महता आनन्देनोद्यापिता।











## प्रथम-आन्तर्जालीय-वेविनार्







२०२०-जुलाईमासस्य सप्तमदिनाङ्के महाविद्यालयपक्षतः प्रथम-अन्तर्जालीय-चर्च्चासत्रं (वेविनार्)''साम्प्रतं कोविड्-१९ परिस्थितौ अध्ययनमध्यापनञ्च'' इति शीषर्कमाधारीकृत्य समायोजितमासीत्। मुख्यसंरक्षकाणां केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतीनां प्रो.परमेश्वरनारायणशास्त्रिणामुद्घाटनभाषणेन तथा कुलसचिवानां प्रो.सुब्रह्मण्यशर्ममहाभागानामुद्बोधनेनास्य शुभारम्भो जातः। अत्र प्रमुखवक्तृरूपेण शान्तिनिकेतन-विश्वभारतीस्थस्य संस्कृत-पालि-प्राकृतविभागस्याचार्याः प्रो.अरुणरञ्जनमिश्रपादाः तथा पूर्वमेदिनीपुरनन्दिग्रामस्थ- सीतानन्दमहाविद्यालयस्य प्राचार्याः डॉ.शमुमाहालिवर्याः छात्रान् प्रबोधयामासुः। कार्यक्रमेऽस्मिन् महाविद्यालयप्रबन्धनसमितेः अध्यक्षाः प्रो.किशोरचन्द्रपाढीवर्याः आध्यक्षपदमलंकृतवन्तः। प्राचार्याणां डॉ.देवीपदरथमहाभागानां निर्देशकत्वेन कार्यक्रमस्यायोजनं परिचालनञ्च डा.किंशुकशाहा- डॉ.दयानन्दपाणिग्राही-श्रीदेवकुमारगोल् - प्रभृतयः कृतवन्तः।

## संस्कृतसप्ताहोत्सव :


**या भाषा समलङ्कृता कविवरैर्या मूल्यसंवर्धिका या ज्ञानेन विभूषिता हि परमा गीर्वाणवाणी मता।**


२०२०तमवर्षस्य अगष्टमासस्य तृतीयदिनाङ्कतः नवमदिनाङ्कं यावत् आन्तर्जालीयः संस्कृतसप्ताहमहोत्सवो महता वैभवेन प्रायोजितः। केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयानां कुलपतीनां प्रो.परमेश्वरनारायणशास्त्रिमहोदयानां समुद्घाटनेन कार्यक्रमस्यास्य शुभारम्भः सञ्जातः। केन्द्रीयसंस्कृतविश्वविद्यालयस्थमुक्तस्वाध्यायपीठस्य निर्देशकाः प्रो.सुकान्तकुमारसेनापतिमहाशयाः कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण तथा च तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य साहित्यविभागस्य वरिष्ठाचार्याः प्रो.सत्यनारायणआचार्याः मुख्यवक्तृत्वेन समुपस्थिताः आसन्। संस्कृतसप्ताहोत्सवस्य उद्घाटनावसरे उद्यापने च महाविद्यालयप्रबन्धनसमितेः अध्यक्षाः प्रो.किशोरचन्द्रपाढीमहोदयाः अध्यक्षतां कृतवन्तः।


तत्रोद्यापनसमारोहे मुख्यातिथिरूपेण समागताः आसन् डॉ.राजेन्द्रप्रसादकेन्द्रीयकृषिविश्वविद्यालयस्य कुलाधिपतयः प्रो.प्रफुल्लकुमारमिश्रमहोदयाः। विशिष्टातिथिरूपेण केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलसचिवाः प्रो. सुब्रह्मण्यशर्ममहोदयास्तथा च मुख्यवक्तृत्वेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरस्य निर्देशकाः प्रो. खगेश्वरमिश्रमहोदयाः उपस्थिताः आसन्।

सम्पूर्णकार्यक्रमोऽयं प्राचार्याणां डॉ.देवीपदरथमहोदयानां निर्देशनेनैवाभूत्। कार्यक्रमस्य समन्वयकरूपेण डॉ.नृसिंहनाथगुरुः, सहसमन्वयकत्वेन डॉ. दयानन्दपाणिग्राही, संयोजकौ श्रीमान्सुरञ्जनपाहाडी तथा श्रीमान् देवकुमारगोल् चासन्। सम्पूर्णोऽयं कार्यक्रमः गुगुल्मीट् माध्यमेन समभवत्।अवसरेऽस्मिन् छात्राणां भगवद्गीतावृत्ति-संस्कृतसङ्गीत-सुभाषितकण्ठपाठ-संस्कृतरचनानुवाद-स्पर्धाः समायोजिताः। प्रायोजितासु निखिलास्पर्धासु नैके प्रतिभागिनः योग्याः छात्राः पुरस्कृताः।










# ७४ तमस्वाधीनतादिवस : परिपालित :



### जननी जन्मभूमिश्च स्वर्गादपि गरीयसी

२०२०तमवर्षस्य अगष्टमासस्य पञ्चदशतमदिनाङ्के ७४ तमस्वतन्त्रतादिवस: छात्रै: प्राध्यापकै: कर्मचारिभिश्च परिपालित:। सर्वकारीयकोरोनानियमावल्यनुसारं स्वल्पसंख्यका: सदस्या: तत्र समुपस्थिता: आसन्। कोरोनामहामारीकाले स्वेन सह अन्येषामपि कथं जीवनं रक्षणीयं तथा स्वच्छताया: उपयोगीताविषयमाधारीकृत्य प्राचार्या: डॉ.देवीपदरथमहोदया: सर्वादौ उद्बोधितवन्त:। ततश्च राष्ट्रियध्वजोत्तोलनपूर्वकं स्वतन्त्रतासंग्रामसूरिणां वीरपुरुषाणाम् अनुस्मरणपूर्वकं महाविद्यालयेन सह समाजस्य राष्ट्रस्य च समुन्नतये युवशक्ति: संघबद्धरूपेण कार्यं कुर्यादित्यप्युपदेश: तै: प्रदत्त:। उपस्थितान् सदस्यान् विहाय अन्ये सर्वेऽपि अध्यापका: , कर्मचारिण: छात्राश्चात्र गुगुल्मीट्द्वारा अन्लाइन् माध्यमेन्भागग्रहणं कृतवन्त:।

## शिक्षक-दिवस-कार्यक्रमः



### गुरोरंघ्रिपद्मे मनश्चेन्न लग्नं तत: किं तत: किम्

ऐषम: कोरोनाकारणत: अन्तर्जालमाध्यमेन डा.सर्वपल्लीराधाकृष्णन्महोदयस्य पुण्यजन्मतिथौ सितम्बरमासस्य ०५दिनाङ्के शिक्षकदिवस: आयोजित:। प्राचार्यस्य ड्रा.देवीपदरथमहोदयस्य आध्यक्षेण आयोजितेऽस्मिन् अन्तर्जालीयसमारोहे सर्वेऽन्तेवासिन: उपस्थिता: आसन्।कार्यक्रमस्यारम्भे भगवत्या: वाचिकमङ्गलाचरणपूर्वकं कार्यक्रमस्य शुभारम्भो जात:। उपस्थिता: सर्वे डा.सर्वपल्लीराधाकृष्णन् महोदयस्य व्यक्तित्वविषये समाजनिर्माणविधौ शिक्षकाणां भूमिका इत्यस्मिन् विषये च छात्राणां कृते उपदेशान् प्रदत्तवन्त:। छात्राणां गुरुवन्दनपूर्वकं शान्तिपाठेन सभेयं समाप्ता।

# श्रीश्रीसरस्वतीपूजनम्



### सरस्वत्यै नमो नित्यं भद्रकाल्यै नमो नम:

कोरोनामहामरीकालेऽपि महाविद्यालयपरिसरे भगवत्या: जगदम्बाया: सरस्वतीदेव्या: समर्च्चनं १६/०२/२०२१ तमदिनाङ्के समभवत्। सर्वकारपक्षत: निर्दिष्टकोरोनानियमानुसारं परम्परानिर्वाहार्थं देव्या: पूजनं यथाविधि परिपालितम्। स्वल्पसंख्यका: महाविद्यालयपरिवारसदस्या: समुपस्थाय भगवत्या: पूजनकर्म सुष्ठु परिचालितवन्त:। विशेषत: प्राचार्य: डॉ.देवीपदरथमहोदय: सर्वेषां मङ्गलार्थं तथा कोरोनामहामारिरूपविश्वस्यार्त्तिं दूरीकरणाय च देवीं प्रार्थयामास।

# छात्राणामुपलब्धयः

२०२० यू.जी.सी.नेट्परीक्षायां समुत्तीर्णा अस्मदीयाः छात्राः

| | | | | |
|---|---|---|---|---|
| १. | शुभङ्कर पण्डा | साहित्यम् | २. जयश्री वेरा | व्याकरणम् |
| ३. | अरूपप्रधानः | व्याकरणम् | ४. महेश्वरवागः | व्याकरणम् |

# अस्माकं गौरवभूताः छात्राः

| | | | |
|---|---|---|---|
| १. | डॉ.पापुरानीसासमलः | सहायिकाचार्या(वि.एड्) | योगोदा सत्सङ्ग पालपडा महाविद्यालयः, पालपडा |
| २. | डॉ.रुपकुमारपण्डा | सहायकाचार्यः(वि.एड्) | मध्यमग्राम वि.एड्. महाविद्यालयः, कोलकता |
| ३. | सुजय अधिकारी | टि.जि.टि(संस्कृतम्) | आर्मिपब्लिकस्कुल, जोरहाट् |
| ४. | अनन्यागिरिः | टि.जि.टि(संस्कृतम्) | सेठ्.एम्.आर्.जयपुरिआ स्कुल, गोमतिनगरम्, लखनऊ |
| ५. | महेश्वरवाग | टि.जि.टि(संस्कृतम्) | डि.ए.भि.पब्लिकस्कुल,विष्णुपुरे, झारखंड |
| ६. | टुनाबारिकः | टि.जि.टि(संस्कृतम्) | ओडिशा |
| ७. | लुकेशवाग | टि.जि.टि(संस्कृतम्) | ओडिशा |
| ८. | चन्दनकरः | टि.जि.टि(संस्कृतम्) | ओडिशा |
| ९. | पङ्कजकुमारमाहाना | अतिथि-अध्यापकः,एम्.पी.सी.जुनियरकॉलेज्,वारिपदा,ओडिशा | |
| ९. | तपनकुमारबेरा | WRI & DD (Agri - Irrigation) | |

# अध्यापकीयवार्त्ता

## ०१.डॉ.किंशुकसाहा

• विगतवर्षे २०२० मईमासतः दिसम्बरमासाभ्यन्तरे महाविद्यालयस्य समाजविज्ञानस्याध्यापकः डॉ.किंशुकसाहामहोदयः ३४ आन्तर्जालीयचर्च्चासत्रेषु अन्ताराष्ट्रिय-राष्ट्रियस्तरेष्वायोजितेषु पत्रोपस्थापकत्वेन तथा प्रतिभागिरूपेण भागं गृहीतवान्।

## ०२. डॉ.संकर्षणपण्डा

• २०२०दिसम्बरमासे विश्वविद्यालय-अनुदान-आयोगस्थमानवसंसाधनविकासमन्त्रालयकेन्द्रानुकूल्येन नवदेहलीस्थे जबाहरलालनेहेरु-विश्वविद्यालये अन्लाइन् माध्यमेन प्रचालितपुनश्चर्यापाठ्यक्रमे व्याकरणविभागस्याध्यापकः डॉ.सङ्कर्षणपण्डा भागमग्रहीत्। किञ्च आन्तर्जालीयचर्च्चासत्र - व्याख्यान-स्वल्पावधिशिक्षा-कार्यशालासु अयं राष्ट्रियान्ताराष्ट्रियस्तरेषु भागं गृहीतवान्।

## ०३. डॉ.नृसिंहनाथगुरुः

• साहित्यविभागस्याध्यापक डॉ.नृसिंहनाथगुरुः ऑन्लाइन् यू.जी.सी.पुनश्चर्यापाठ्यक्रमे २०२०दिसम्बरमासे विश्वविद्यालय-अनुदान-आयोगस्थमानवसंसाधनविकासमन्त्रालयकेन्द्रे जवाहरलालनेहेरुविश्वविद्यालयस्थे अंशग्रहणमकरोत्। तथा च ऑन्लाइन् आयोजितासु चर्च्चासु, तथा व्याख्यानेषु पत्रोपस्थापकरूपेण भागं गृहीतवान् । किञ्च श्रीगौरकृष्णोदयमहाकाव्यमिति संपादनग्रन्थस्य प्रकाशनमकरोत्।

## ०४. डॉ.दयानन्दपाणिग्राही

• अद्वैतवेदान्तविभागस्य अध्यापक डॉ.दयानन्दपाणिग्राही यू.जी.सी.पुनश्चर्यापाठ्यक्रमे २०२०दिसम्बरमासे भागग्रहणं कृतवान्। पुनश्चर्यापाठ्यक्रमोऽयं विश्वविद्यालय-अनुदान-आयोगस्थमानवसंसाधनविकासमन्त्रालयकेन्द्रानुकूल्येन नवदेहलीस्थे जबाहरलालनेहेरु-विश्वविद्यालये प्रचालित आसीत्।इतश्च त्रिंशदधिकमान्तर्जालीयचर्च्चासत्रेषु, व्याख्यानेषु,उपनव स्वल्पावधिशिक्षा-कार्यशालासु अयं राष्ट्रियान्ताराष्ट्रियस्तरेषु भागमगृह्णत्।

# अस्माकं महाविद्यालयः

वङ्गप्रदेशस्य एकस्मिन् प्रान्तभागे उत्कलप्रदेशस्य सीमान्तवर्त्तिक्षेत्रे ग्राम्यपरिवेशस्य प्राकृतिकशोभाविमण्डितप्रान्ते च विद्यमानोऽयं महाविद्यालयः कृतविद्यान् विद्यार्थिनो निर्माय समग्रे प्रदेशे स्वनिमित्तं स्वतन्त्रस्थानस्य संरक्षणं कृतमस्ति। अभिज्ञानामध्यापकानाम् अध्यापनबलेन अस्यानुष्ठानस्य बहवो मेधाविछात्राः स्वर्णपदकादीनि सम्प्राप्य स्वस्वक्षेत्रे प्रतिष्ठां लब्धवन्तः। इयं भूमिः मे धन्या ।यतो हि अस्मदादीनां प्रातःस्मरणीयानामृषिकल्पानां पण्डितप्रवराणां विद्यासागर- महोदयानां जन्मभूमिः, अपि च प्रसिद्धकथाकारस्य वङ्किमचन्द्रस्य कर्मभूरियम्। एतादृशमहनीयपुरुषाणां प्रदेशे विगते १९९८ तमे ख्रीष्टाब्दे अत्रत्यभूमिदातृस्वर्गीय- जगदीशचन्द्रसाहु-ज्योतिर्मयसाहुमहोदययोः पितृणां स्वर्गतविक्रमकिशोरसाहुमहोदयानां नामानुसारेण संस्थापितोऽयं महाविद्यालयः। प्रतिवर्षमस्य राज्यस्य दूरवर्त्ति वर्धमान-वाँकुडा-सागरदीप-हुगुलि-पुरुलिआप्रभृति मण्डलेभ्यः तथा च विहार-उत्कलप्रदेशाच्च ( त्रिवेणीसंगमवत् अंगवंगकलिङ्गादि- देशेभ्यः) छात्रा अत्रागत्यानुदिनं सश्रद्धं सानन्दं संस्कृतं पठन्त्येव। मेदिनीपुरमण्डलस्य अयमेक एव संस्कृतमहाविद्यालयो यत्र छात्रा आचार्योपाधि-(एम्.ए)मधिगम्य विद्यालयेषु महाविद्यालयेषु च नियुक्तास्सन्त अध्यापनादिकृत्यं कुर्वन्ति। समग्रे भारतवर्षे आचार्यपरीक्षायां प्रथमस्थानमधिगत्यास्य महाविद्यालयस्य नैके छात्राः प्रायशः राष्ट्रियसंस्कृतसंस्थानेन स्वर्णपदकैः विभूषिताः, अखिलभारतीयशास्त्रीय-स्पर्धासु अस्य छात्राः स्थानमवाप्य भृशं प्रशंसिताश्च। संस्थानस्य बहुषु परिसरेष्वस्य छात्राः शिक्षाशास्त्रि-शिक्षाचार्य-गवेषणादिकञ्च कुर्वन्तो विराजन्ते। प्रतिवर्षं महाविद्यालयस्य प्रायशः छात्राः यू.जी.सी. नेट् / जे.आर्.एफ् परीक्षासु उत्तीर्णा भवन्ति। प्राक्शास्त्रिकक्षातः आचार्यकक्षां यावत् विविधाः शास्त्रीयविषयाः यथा साहित्य-धर्मशास्त्र-नव्यव्याकरण-अद्वैतवेदान्ता अध्याप्यन्ते। शास्त्रिस्तरे सम्मानपाठ्यक्रमेण सह वांग्ला - आंग्ल -समाजशास्त्र - संगणकविज्ञान -परिवेशविज्ञानादिविषया अप्यध्याप्यन्ते इति।



# निवेदनम्

कोरोनाविभीषिकाकारणतः सम्पूर्णमपि विश्वं त्रस्तमासीत्। तन्निरोधोपायान् अन्विष्यमाणाः सर्वेऽपि विश्ववासिनः वैज्ञानिकाः चिकित्सकाश्च सततं प्रयत्नरताः आसन्। एतादृशे संकटापन्नकाले जगति सर्वमपि कार्यं स्थगितमभूत् भवतीदानीमपि। अथ किम्? शिक्षाव्यवस्थापि सङ्कीर्णा जाता। श्रेणीगृहपठनादिकं कार्यं सम्पूर्णरूपेण निषिद्धमभवत्। अतः तद्विषये चिन्तनपूर्वकं तस्माद्बहिरागन्तुं सर्वत्र नूतनाः उपायाः अविर्भूताः। प्रायशः आन्तर्जालीयशिक्षायाः प्रचारं प्रसारञ्च सर्वत्र अत्यन्तोत्साहेनाभवत्। एतद्विषयविचारपूर्वकमगतिकगतिन्यायेन सर्वकारीयनियमावलम्बनपूर्कं महाविद्यालयपक्षतः छात्राणामुपकाराय महाविद्यालयस्य च प्रगतौ स्थितान् विघ्नान् यथाकथञ्चिन्निवारणाय नैकेषामान्तर्जालीयकार्यक्रमाणायोजनं कृतमासीत्। सर्वमप्यत्र दातुमशक्यत्वाद्विगतवर्षस्यैव वार्त्ताः नीत्वा ऐषमः कलियाचक-आदर्शवार्त्तायाः द्वितीयसंस्करणं प्रकाश्यते। अस्मिन्नेवावसरे सर्वेभ्यः कोरोनायोद्धभ्यः ये खलु विभीषिकायामस्यां सततं सेवायां निरताः आसन् तेभ्यः वारम्वारं प्रणतिततीः वितनुमः।

# सम्पादकीयम्

सुरभारत्याः गीर्वाणवाण्याः भाषाजनन्याः संस्कृतभाषायाः प्रचाराय प्रसाराय चानुदिनं वयं बद्धपरिकराः। करालकोरोनाकालेऽप्यबाधमानगत्या अस्माकं महाविद्यालयः एतदर्थमाप्राणप्रयासो विहितः। २०१९-२०२० तमवर्षस्य वार्त्तापत्रिकायाः प्रथमपुष्पस्य सुखदप्रकाशनानन्तरं नवबधूरिव सुसज्जिता सती द्वितीयवारं नवरूपेणात्मानं प्रकाशयन्ती पुनः 'कलियाचक-आदर्शवार्त्ता' नाम्नी मनोरमा वार्त्तापत्रिकेयं प्राचार्यसमेताना-मस्मत्परिसरीयच्छात्राणामध्यापकानां, कर्मचारिणाञ्च वार्षिकी या प्रगतिः, या समुन्नतिः, तस्याः लोकमुखीकरणाय अस्मदीयप्रयत्नरूपेण बहिरेति। पत्रिकाप्रकाशने शुभेच्छावार्त्ताप्रदत्तवद्भ्यो नवदिल्लीस्थकेन्द्रीय संस्कृत-विश्वविद्यालयस्य सम्माननीयकुलपतिभ्यः प्रो.डॉ.के.बि.सुब्बरायुडु-महोदयेभ्यः, कुलसचिवेभ्यः प्रो.डॉ.सुब्रह्मण्यशर्ममहाशयेभ्यः,दूरस्थशिक्षण-निर्देशकेभ्यः प्रो.डॉ.सुकान्तकुमारसेनापतिमहाभागेभ्यः, परीक्षानियन्त्रकेभ्यः प्रो.डॉ.पवनकुमारवर्येभ्यश्च पौनः पुन्येन कृतज्ञतां व्याहरामः। किञ्च शुभाशंसाप्रदानपूर्वकमुपकृतवद्भ्यः अस्माकं महाविद्यालयप्रबन्धनसमितेः अध्यक्षेभ्यः प्रो.डॉ.किशोरचन्द्रपाढीमहोदयेभ्यः कृतज्ञतां वितनुमः। गुणग्राहिणः विद्वत्तल्लजाः विद्वान्सः पत्रिकायां स्थितदोषाणां परित्यागपूर्वकं गुणाः केवल गृह्णन्त्विति विनम्रतया सम्प्रार्थ्यते।

**प्रधानसम्पादकः**



डॉ.देवीपदरथः
प्राचार्यः

**सम्पादकाः**



डॉ. संकर्षणपण्डा



डॉ.नृसिंहनाथगुरुः



डॉ.दयानन्दपाणिग्राही


**प्रकाशकः**

कलियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालयः,
हेडिया,पूर्वमेदिनीपुरम्,पश्चिमवंगः-७२१४३०
दूरभाषः - ०३२२० - २७६०३६
ईमेल् - kaliachakbkasm@gmail./yahoo.com
Web http://kaliachakbkasanskritmahavidyalaya.org/